# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

**कक्षा**- शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्रम्** - ५ (New) **गुणाः** - ७०

**विषयः** - नव्यव्याकरणम् **कोड**- **CC - 3.5.9** **समयः** - १० तः १

**दिनाङ्कः** - ०८/१२/२०१८ **सन्दर्भग्रन्थः**- परिभाषेन्दुशेखरः वाक्यपदीयञ्च

---

**॥ प्रथमान्वितिः ॥**

**प्र-१ निम्नलिखितेषु द्वयोः व्याख्या कार्या ।** १०

१. यस्मिन्विधिस्तदादावल्ग्रहणे ।

२. सर्वो द्वन्द्वो विभाषयैकवद्भवति ।

३. परान्नित्यं बलवत् ।

**प्र-२ निम्नलिखितयोः एकस्याः परिभाषायाः सप्रसङ्गं व्याख्या कार्या ।** १०

१. एकदेशविकृतमनन्यवत् ।

२. पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ निम्नलिखितेषु द्वयोः व्याख्या कार्या ।** १०

१. पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्येकादेशो न ।

२. अन्तरङ्गानामपि विधीन् बहिरङ्गो ल्यप् बाधते ।

३. वार्णादाङ्गं बलीयो भवति ।

**प्र-४ निम्नलिखितयोः एकस्याः परिभाषायाः सप्रसङ्गं व्याख्या कार्या ।** १०

१. नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ।

२. अन्तरङ्गानामपि विधीन् बहिरङ्गो लुग् बाधते ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ निम्नलिखितासु कारिकासु कारिकाद्वयं सप्रसङ्गं व्याख्येयम् ।** १०

१. एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृ-भोक्तव्य-रूपेण भोगरूपेण च स्थितिः ॥

२. आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधा ॥

३. तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥

**प्र-६ वाक्यापदीयानुसारं शब्दब्रह्मणः स्वरूपं प्रतिपादयत ।** **१०**

अथवा

**वेदस्य महत्त्वं स्वाधीतग्रन्थदिशा वर्णनीयम् ।**

**॥ चतुर्थान्वितिः ॥**

**प्र-७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशनां प्रश्नानां लघूत्तरं देयम् ।** **१०**

१. पूर्वशास्त्रापेक्षया परशास्त्रं किं भवति ?
२. परशास्त्रात् किं शास्त्रं बलवत् भवति ?
३. सर्वाधिकं बलवत् किं शास्त्रं भवति ?
४. सकृद्गतौ विप्रतिषेधे यद्बाधितं ततं किं भवति ?
५. विकरणेभ्यो को बलीयान् भवति ?
६. अन्तरङ्गे कार्ये कर्तव्ये किम् असिद्धं भवति ?
७. अन्तभूतान्यङ्गानि निमित्तानि यस्य तत् किं भवति ?
८. षत्वतुकोः सूत्रस्थं तुग्ग्रहणं कस्याः परिभाषाया ज्ञापकम् ?
९. अकृतव्यूहाः के भवन्ति ?
१०. अन्तरङ्गादपि को बलवान् भवति ?
११. जगतः प्रक्रिया कथं विवर्तते ?
१२. जन्मादयः कति विकाराः सन्ति ?
१३. शब्दतत्त्वब्रह्मणः प्राप्त्युपायः कः ?
१४. सिद्धिसोपानपर्वणाम् आद्यं पदस्थानं किम् ?
१५. शब्दार्थसम्बन्धाः कथं भवन्ति ?